# karuNastotram

# કરુણસ્તોત્રમ્

## Document Information

Text title : karuNastotram

File name : karuNastotram.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Author : shivadattakaviratna

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# કરુણસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
ક્ષાન્તાનિ તાનિ નિખિલાનિ મહાન્તિ નૂનમાગાંસિ મે પ્રણતપાલનતત્પરેણ ।
યત્તેન નાથ ભવતો વિમુખત્વરૂપમાગોઽપિ હન્ત વિકલસ્ય મમ ક્ષમસ્વ ॥ ૧॥

યન્નાથ હન્ત સતતં વિપદાકુલેન ત્વત્પાદયોઃ પ્રણમનં ન મયા વ્યધાયિ ।
વિસ્મૃત્ય સમ્પ્રતિ ચિરાય મમૈતદાગસ્તાં સન્નિધેહિ કરુણાં મયિ દીનબન્ધો ॥ ૨॥

નિર્વ્યા જમાર્ત્તપરિપાલનદીક્ષિતત્વં પાપ્માન્તકૃત્ત્વમચિરાચ્ચ સમન્નિકામમ્ ।
કાર્યા તથાઽપિ વિનતે નતિમાત્રતઃસ્ત્રાક્ સન્તુષ્યતા મયિ દયૈવ વિભો
ત્વયાઽદ્ય ॥ ૩॥

સર્વેષુ પાતકપરેષુ પરં પ્રસિદ્ધં માં ત્રાસ્યસે યદિ શરણ્ય તદૈવ નાથ ।
પાપીયસામપિ સકૃચ્છરણં ગતાનામુદ્ધારદીક્ષિતતયા પ્રથિતોઽસિ ભાવી ॥ ૪॥

કે નામ પાતકકૃતો ભવતાઽદ્ય યાવન્ નૈવોદ્ધૃતા યદિ ગતાઃ શરણં કદાચિત્ ।
કિન્ત્વેષુ હન્ત! મહિતસ્ય દયાનિધે મે સન્તારણાવસર એષ યશોઽભિલાષિન્ ॥ ૫॥

વિશ્વમ્ભરસ્ય કરુણાવરુણાલયસ્ય સર્વેશ્વરસ્ય મહિતસ્ય યશસ્વિનાં તે ।
આર્ત્તેષ્વનન્યશરણેષુ ન નાથ સમ્પ્રત્યેવંવિધત્વમુચિતં બત માદૃશેષુ ॥ ૬॥

ત્વત્સમ્મુખે વિલપતામપિ માદૃશાનામાર્ત્તિં નિહત્ય ન યતઃ શિવમાદધાસિ ।
હા દીનબન્ધુરપિ સન્ ભગવન્ વિભો તદન્ધોઽસિ હન્ત બધિરોઽસિ જડોઽસિ
કિંવા ॥ ૭॥

હા નાથ દીનજનતૈકશરણ્ય હન્ત કિં નામ માં મ્વશરણં પરિપાસિ નાદ્ય ।
કો વાઽખિલેષુભુવનેષુ મદન્ય આર્ત્તો યં નન્દયન્ વિતરિતાસિ નિજામમિખ્યામ્ ॥ ૮॥

કર્માનુસારિફલદાનવિધૌ સમર્થૈરન્યૈર્દયાલુભિરપિ ત્રિદશૈર્હતાનામ્ ।
નાથ ત્વમેવ શરણં તનુ માદૃશાનાં સર્વેશ્વરશ્ચ કરુણશ્ચ ન
યત્ પરોસ્તિ ॥ ૯॥

કિં નામ માં ન પરિપાસિ દયાવિધાન કિં હન્ત વા ત્વમપિ કર્મમુખપ્રતીક્ષઃ ।
ચેદેવમેવ બત તર્હિ ચિરાય લોકે નિર્વ્યાજપાલનપરત્વમપાકૃતં સ્યાદ ॥ ૧૦॥

નાનાવિધાનિ વૃજિનાનિ મયા મહાન્તિ કામં કૃતાનિ યદપિ ત્રિદશાધિનાથ ।
શ્રીમન્નથાપિ શરણાગતવત્સલત્વસમ્ભાવનાય પરિપાહિ સમાશ્રિતમ્મામ્ ॥ ૧૧॥

મામન્તરેણ ભુવનેષ્વખિલેષુ કશ્ચિન્ નૈતસ્ય હન્ત પતિતસ્ય સમાશ્રયોઽન્યઃ ।
ઇત્યેવ નાથ પરિપાહિ દયાનિધાન કર્માણિ વિસ્મર ચિરાય કૃતાગસોઽપિ ॥ ૧૨॥

આર્ત્તો ન કુત્રચન કશ્ચન તે મદન્યસ્તાદૃગ્જનાર્ત્તિહરણે ચ પરઃ પરસ્ત્વત્ ।
સમ્પ્રત્યથાપિ ભગવન્ કિમુ માં ન પાસિ કિં વા ન પશ્યસિ ચિરાય
યશોમહત્ત્વમ્ ॥ ૧૩॥

ત્વામાશ્રિતોઽહમિતિ નાથ! પરં નિશમ્ય પાપીયસોઽપિ બત! નઃ પરિપાસિ સદ્યઃ ।
તસ્માત્ત્વમેવ ભુવનેષ્વખિલેષુ વિષ્વઙ્ મુખ્યો મતોઽસિ
શરણાગતવત્સલાનામ્ ॥ ૧૪॥

ત્વામાશ્રિતોઽસ્મિ પરિપાલય દીનબન્ધો ઇત્યેવ દુષ્કૃતવતામપિ માદૃશાનામ્ ।
આકર્ણ્ય જાતુ પરિદેવનમીશ સદ્યો રક્ષસ્ત્વમેવ મહિતઃ કરુણાકરેષુ ॥ ૧૫॥

અગ્રે સરા યદપિ દારુણદુષ્કૃતાનિ સન્તન્વતાં ધ્રુવમથી તદપિ પ્રપન્નાઃ ।
ઇત્યેવ માદૃશજનાન્ પરિપાસિ યત્ત્વં વિષ્વક્ તદેવ ભગવન્ પ્રથિતઃ
શરણ્યઃ ॥ ૧૬॥

ત્રાણોચિતાનિ સુકૃતાનિ કિમસ્ય કામં દઝ્યાનિ કિન્તુ દુરિતાન્યથવેતિ નાથ ।
ચેચ્ચિન્તયેઃ પતિતપાવન માદૃશાનામભ્યર્થના તવ ચ વત્સલતા મૃષૈવ ॥ ૧૭॥

યદ્યપ્યતીવ પતિતોઽસ્મિ દયાનિધાન સમ્પ્રત્યથાપિ ભવતઃ શરણં પ્રપન્નઃ ।
તસ્માચ્છરણ્ય ભવતા પરિરક્ષણીયો જાનેઽન્યથા મમ કદાઽપિ ન રક્ષણં
સ્યાત્ ॥ ૧૮॥

કુત્રાપિ હન્ત પતિતોનમતો મદન્યઃ સત્યં તથાઽપિ ભવતઃ શરણં પ્રપન્નઃ ।
એવં સ્થિતો મમ નિરાકરણં ચિરાય સંરક્ષણં સપદિ વા બત નાથ યુક્તમ્ ॥ ૧૯॥

ભુક્તાનિ પાતકફલાનિ ચિરાદ્ બહૂનિ નેતઃ ચરં કિમપિ ભોક્તુમહં સમર્થઃ ।
ત્વં દીનબન્ધુરિતિ નાથ જગત્સુ વિષ્વક્ ખ્યાતોઽસિ યત્ પતિતપાવન પાહિ તસ્માત્ ॥ ૨૦॥

મૃત્યોઃ કરાલવદને પતિતોઽહમદ્ય યાવત્ પ્રકામમમરેશ વિધેરધીનઃ ।
અપ્યેત્ય હન્ત! ભવતોઽભિમુખં કથઞ્ચિદ્ યદ્યદ્ય શર્મ્મ ન લભેય તતો યશઃ કિમ્ ॥૨૧॥

અન્યાશ્રિતો યદિ વિભો! યદિ વા નિરાગાઃ સ્યાન્નિર્ભયો જગતિ હન્ત! ભવાદૃશાનામ્ ।
કિં તેન કિઞ્ચિદુદિતં કરુણાનિધિત્વં કિંવા મહત્સુ મહિમા મહિતોંઽશતોઽપિ ॥ ૨૨॥

કુર્વન્નનાથપતિતોદ્ધરણં સમન્તાલ્લોકે મહત્ત્વમુપયાતિ દયાનિધીનામ્ ।
મામુદ્ધરિષ્યસિ ન તદ્ યદિ નાથ સદ્યઃ કિં હન્ત! તર્હિ મહિમા વિમલસ્ત્વદીયઃ ॥ ૨૩॥

યન્માદૃશાનપિ સુદુષ્કૃતિનોઽતિદીનાન્ મત્વા સમુદ્ધરસિ મઙ્ક્ષુ સમન્તતસ્ત્વમ્ ।
તદ્ દીન બન્ધુરિતિ નામ તવ ત્રિલોક્યાં સ્થાને શરણ્ય ભગવન્ નિતરાં પ્રસિદ્ધમ્ ॥ ૨૪॥

વિશ્વમ્ભરોઽસિ યદિ મામપિ તદ્બિભર્ષિ સાહાય્યમાચરસિ મે યદિ દીનબન્ધુઃ ।
યત્ પાવનસ્તદિતિ નાથ પુનાસિ નેદં ચિત્રં સ્વનામમહિમાનમુશન્તિ સર્વે ॥ ૨૫॥

યદ્યાગમિષ્યમઘહન્ શરણં તવાહં ત્વં નાથ યદ્યદહરિષ્ય ઇમમ્ શરણ્ય ।
ઉદ્ધૃત્ય સમ્પ્રતિ યશો લભસે સ્મ યાદૃક્ કિં તાદૃશં કથય નાથ તતોઽન્યથાઽપિ ॥ ૨૬॥

સત્યં યદિ ત્વમસિ માધવ દીનબન્ધુઃ કિમ્માં કદર્થયસિ હન્ત! પુનઃ પુનસ્તત ।
એવં વિલાપિનિ જને કૃપણોઽપિ સદ્યઃ સમ્પદ્ય સાધુ મૃદુતાં કરુણાં તનોતિ ॥ ૨૭॥

યાવત્ સમં કરુણયા પરરક્ષકત્વં સાધારણોઽપિ ભજતે યદિ કીર્ત્તિલિપ્સુઃ ।
વિશ્વમ્ભરત્વમહિતઃ પુનરેતમેવં વ્યાપાદયસ્યહહ તત્ત્વમિવ ત્વમેવ ॥ ૨૮॥

સર્વેઽપ્યમી તવ વશે જગદીશિતારઃ પુંસાં શુભાશુભવિધૌ પ્રભવો ભવન્તિ ।
તસ્માત્ત્વમેવ બત તત્તદપાકૃતસ્ય માદૃગ્જનસ્ય શરણૈષિણ આશ્રયોઽસિ ॥ ૨૯॥

પાયા યદિ ત્વમપિ નાથ ન પીડ્યમાનં તૈસ્તૈઃ પરસ્ય ચરિતૈકદૃશાં પ્રસિદ્ધૈઃ ।
લોકઃ શરણ્ય શરણં બત કસ્ય યાયાત્ કો વા ભવેત્ પતિતપાવન દીનબન્ધુઃ ॥ ૩૦॥

વ્યાધાદયોઽપિ ભગવન્ વિહિતાપરાધાઃ સન્તારિતાઃ સપદિ હન્ત યદા દયાલો ।
એકાકિનં પુનરિમં પરિપીડયંસ્ત્વં તત્તાં નિજાં કિમુ નિરાકુરુષે ચિરં ન ॥ ૩૧॥

દીનોઽસ્મિ દીનદયિતોઽસિ સુદુઃખિતોઽસ્મિદુખાન્તકસ્ત્વમસિ નાથ સુદુઃખિતાનામ્ ।
પાપ્માસ્મિ પાવનકૃતાં પ્રથમોઽસિ નિત્યં તન્માં પ્રભો ઝટિતિ પાલય પાવયાદ્ય ॥ ૩૨॥

કર્મ્માનુસારમશુભં ચ શુભં ચ ભોગ્યં સર્વસ્ય દૈવનિયતં જગતો ન ચિત્રમ્ ।
ભૂયોઽપિ ભોઃ પતિતપાવન નામ યત્તે તન્માં પુનીહિ ચ કૃતાર્થય તામભિખ્યામ્ ॥ ૩૩॥

સર્વાર્થપૂર્ત્તિકરણે બહવઃ પ્રસિદ્ધાઃ કલ્પાદ્રુમપ્રભૂતયઃ શરણાગતાનામ્ ।
હે નાથ યદ્યથ બિભર્ષિ પરાઙ્મુખાંસ્ત્વમેતાદૃશાંસ્તદાસિ સત્યમનુગ્રહીતા ॥ ૩૪॥

નાથ ત્વમેવ યદિ સર્વજગન્મયસ્તન્માં પીડયન્ કિમુ ન પીડયસિ સ્વમદ્ય ।
ચેત્ત્વં પુનર્બત જગદ્બત એવ કશ્ચિત્કિં તર્હિ ભોસ્તદપિ કર્મભુજઃ શુભેચ્છા ॥ ૩૫॥

વિશ્વં સમુદ્ધરસિ સર્વમપિ ત્વમીશ તન્માં સમુદ્ધરસિ કિં ન દયાનિધાન ।
વિશ્વમ્ભર ત્વમપિ કર્મમુખપ્રતીક્ષસ્તત્ કિં પ્રભુત્વમનુકમ્પવિધૌ ત્વદીયમ્ ॥ ૩૬॥

ઇતિ શ્રીશિવદત્તકવિરત્નપ્રણીતં કરુણસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Nat Natarajan, NA

*karuNastotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*